## सेंट मारग्रेट सीनियर सेकंडरी स्कूल

## डी ब्लॉक, प्रशान्त विहार, रोहिणी, दिल्ली - 110085.

### आदर्श प्रश्न पत्र

**कक्षा : दशमी** **विषयः - संस्कृतम्**

**अवधिः - होरात्रयम्** **पूर्णांकाः - 80**

**<u>निर्देशाः -</u> (1) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।**

**खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः** **खण्डः (ख) - रचनात्मककार्यम् – 15 अङ्काः**

**खण्डः (ग) - अनुप्रयुक्त-व्याकरणम् – 25 अङ्काः** **खण्डः (घ) - पठित-अवबोधनम् - 30 अङ्काः**

**(2) सर्वे प्रश्नाः अनिवार्याः ।** **(3) प्रश्नानां उत्तराणि खण्डानुसारम् क्रमेणैव लेखनीयानि।**

**(4) प्रश्नसंख्या अवश्यम् लेखानीया।** **(5) उत्तराणि संस्कृतेन एव लेखनीयानि।**

**[ खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः]**

**प्रश्न 1.अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्त प्रश्नानानाम् उत्तराणि लिखत :-**

एकदा एकः संन्यासी नृपस्य भवनम् अगच्छत्। नृपः तस्य हार्दिक स्वागतम् अकरोत् समुचित भोजनप्रदानादिभिश्च अतिथिसत्कारम् अकारयत्। संन्यासिना सह वार्तालापप्रसङ्गे राजा तम् अपृच्छत्-'हे महात्मन्! मम कृते सर्वाधिकं करणीयं किं कार्यम् अस्ति येन अहं पुण्यं प्राप्तुं शक्नुयाम्?' स्पष्टवक्ता संन्यासी अवदत्-'हे राजन्! यदि भवान् पुण्यं प्राप्तुमिच्छपित तर्हि अधिकाधिकं शयनं करोतु।' नृपः विस्मयेन अपृच्छत्-'भवता एतत् कीदृशं करणीयम् उपदिश्यते? अधिकाधिकशयनेन अधिकाधिकं पुण्यं प्राप्यते किम्? अहम् तु एतद् अवगन्तुं सर्वथा असमर्थोऽस्मि।' संन्यासी विहस्य अवदत्-'यावदधिकं भवान् स्वप्स्यति, तावदधिकमेव प्रजाः तव अत्याचारेभ्यः मुक्ताः भविष्यन्ति। भवतः पापानामपि तावान् क्षयः भविष्यति।' एतदुक्त्वा संन्यासी बहिरगच्छत्, परं नृपस्तु प्रजानाम् पीडाम् अनुभवन् आत्मानं समीक्षमाणः पश्चात्तापं कर्तुमारभत। अहो! महात्मनाम् प्रभावः!"

I. एकपदेन उत्तरत - **(1/2x2=2)**

(i) कः नृपस्य भवनम् आगच्छत्? (ii) संन्यासिनः मतेन राजा कथम् अधिकाधिकं पुण्यं प्राप्तुं शक्नोति?

II. पूर्णवाक्येन उत्तरत- **(2x2=4)**

(i) वार्तालापप्रसङ्गे राजा संन्यासिनं किम् अपृच्छत्? (ii) संन्यासिनः बहिर्गमनान्तरं नृपस्य कीदृशी अवस्था अभवत्?

III. भाषिककार्यम् - **(1x3=3)**

(i) हानिः अस्य पदस्य समानार्थकं पदम् अनुच्छेदात् चित्वा लिखत।

(अ) प्रभावः (ब) पुण्यम् (स) क्षयः (द) कृते

(ii) अस्मिन् अनुच्छेदे रुदित्वा इति पदस्य किं विलोमपदं प्रयुक्तम्?
(अ) एतदुक्त्वा (ब) अनुभवन् (स) शक्नुयाम् (द) विहस्य

(iii) 'भवतः पापानाम् अपि तावान् क्षयः भविष्यति।'-अस्मिन् वाक्ये किं विशेषणपदम्?
(अ) भवतः (ब) पापानाम् (स) तावान् (द) क्षयः

IV. अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत। **(1)**


## खण्ड: (ख) - रचनात्मककार्यम् – 15 अङ्काः

**प्रश्न 2.मित्रस्य कुशलतां ज्ञातुं तं प्रति लिखिते पत्रे रिक्तस्थानानि पूरयत – (1/2x10=5)**
दिल्लीतः
तिथि.....
मित्रवर श्री रमेश!
सप्रेम नमोनमः

………. (i)…… दिनानि व्यतीतानि परं भवताम् ..........(ii)………. पत्रं मम हस्तगतं न जातम्। अतएव् ........... (iii)……….न केवलम् अहम् एव प्रत्युत मम ...........(iv)……….. सर्वे जनाः अपि .......... (v)………. सन्ति। गृहस्य ...........(vi) ….. च सर्वः .......... (vii)………. समीचीनः एव अस्ति। भवता .... (viii)………. पारिवारिकं च सर्वं वृत्तम् अविलम्बितं ............(ix)……, येन अस्माकं ...... (x)……. अपगता स्यात्।
तव कुशलकांक्षी सुहृद्
वरुणः

**<u>मञ्जूषा-</u>** चिन्ताकुलाः, लेखनीयं, परिवारस्य, बहूनि, परिवारस्य, चिन्ता, एकमपि, समाचारः, सम्प्रति, स्वकीयं।

**प्रश्न 3.अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया पञ्च वाक्यानि लिखत। (1x5=5)**



**<u>मञ्जूषा -</u>**उड्डीयते, नरम्, कूपात्, पाययति, काकः, गगने खगाः, जलं, वृक्षस्य, एका महिला, रज्ज्वा, प्रतीक्षते, निष्कासयति, उपरि, द्विमहिले।

अथवा

**'क्रीडायाः महत्त्वम्' इति विषयम् अधिकृत्य मंजूषायाम् प्रदत्त-शब्दानाम् सहायतया संस्कृतेन पञ्चवाक्यानि वाक्यानि लिखत। (1x5=5)**

**मंजूषा**

| |
|---|
| महत्त्वपूर्णम् , सर्वेभ्यः , अनिवार्यम् , स्वास्थ्याय, जीवनम् , संयमः , स्थानम् , सफलाः , जनाः , क्रीडा |

**प्रश्न 4.अधोलिखितायां कथायां मञ्जूषायाः पदानि अवचित्य रिक्तस्थानपूर्तिः क्रियताम् – (1x10=5)**

रामायणे इदं वर्णितं यत् एकदा स्व (i) …………….. जनकपुत्री सीता शृङ्गारम् अकरोत्। सा षोडश शृङ्गारं कृत्वा स्वशिरसि सौभाग्यचिह्न सिन्दूरम् अरचयत्। एतद् दृष्ट्वा श्रीहनुमान् (ii) …………….. अपृच्छत्–"मातः! भवती कथं (iii) …………….. स्वमस्तके सिन्दूरं रचयति।" माता सीता अवदत्-"प्रियवर! अनेन (iv) …………….. स्वामिनः आयुः (v) ………… सः प्रसीदति अपि। अतः अहम् एवं करोमि।" एतच्छ्रुत्वा हनुमान् ततः (vi) ………………। एकस्मिन् दिवसे श्रीहनुमान् सम्पूर्णे शरीरे (vii) …………….. लिम्पित्वा राजसभाम् आगच्छत्। तदा तस्य रक्तवर्णं (viii) …………….. दृष्ट्वा सर्वे जनाः अहसन्। कारणं पृष्टे सति हनुमान् अवदत्-"माता अवदत्-सिन्दूरेण स्वामिनः प्रसन्नता आयुश्च वर्धते, अतः अहमपि तेन कारणेन एव (ix) ……… शरीरे सिन्दूरम् अलिम्पम्।" एतच्छ्रुत्वा (x) ……… प्रसन्नः भूत्वा तस्य आलिङ्गनम् अकरोत्।

| |
|---|
| **<u>मञ्जूषा</u>** – शरीरम्, श्रीरामः, वर्धते, शृङ्गारकक्षे, प्राचलत्, स्वसम्पूर्णे, प्रतिदिनम्, सिन्दूरम्, सीताम्, सिन्दूरेण। |

**[ खण्डः (ग) - अनुप्रयुक्त-व्याकरणम्** – 25 **अङ्काः**]

**प्रश्न 5. अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरम् पत्त विकल्पेभ्यः चित्वा लिखत (1 × 4 = 4)**

(i) भ्रष्टाचारेण अस्माकम् <u>समाज + ठक्</u> पतनं भवति !
(क) सामाजिकम् (ख) सामाजिकः (ग) सामाजिक (घ) समाजिकी

(ii) <u>बलवती</u> हि आशा
(क) बली + मतुप् (ख) बल + मतुप् (ग) बल + णिनि (घ) बलवत्

(iii) भवनस्य <u>सुन्दर + तल्</u> दर्शनीया अस्ति।
(क) सुन्दरता (ख) सुन्दरतम् (ग) सुन्दरतल् (घ) सुन्दरत्

(iv) एषा <u>चतुरा</u> बालिका अस्ति ।
(क) चतुरता + टाप् (ख) चतुरम्+टाप् (ग) चतुर+टाप् (घ) चतुः टाप्

(v) **प्रश्न 6. अधोलिखित वाक्येषु रेखाङ्कितपदेषु सन्धिं/सन्धिविच्छेदं वा कुरुत - (1 × 4 = 4 )**

(i) <u>सकलम् + जगद्</u> ध्वस्तं भविष्यति । (ii) मन्ये <u>वायोः + इव</u> सुदुष्करम्।
(iii) सूर्यः <u>प्रातः + उदेति</u> । (iv) <u>जगत् + ईश्वरः</u> प्राणिनाः रक्षकोऽस्ति ।

**प्रश्न 7. अधोलिखित वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -**

**(1 × 4 = 4)**

(i) <u>त्यागसमं</u> सुखं नास्ति।

(क) त्यागात् समय (ख) त्यागेन समम् (ग) त्यागस्य समम् (घ) त्यागैः समम्

(ii) अहो न ज्ञानं भवत्याः।
(क) न ज्ञाने (ख) नः ज्ञाने (ग) अज्ञानम् (घ) अज्ञाने

(iii) मातापितरौ पूजनीयौ।
(क) मातुः पितु च (ख) मातरौ पितरौ च (ग) माता च पिता च (घ) मात्रोः पित्रो च आनय

(iv) तत सचित्रम् पुस्तकम् अत्र ।
(क) चित्रस्य समीपे (ख) चित्रस्य पश्चात: (ग) चित्रेण सहितम् (घ) चित्रस्य अभावः

**प्रश्न 8. प्रदत्त विकल्पस्य उचितम् अव्ययपदम् चित्वा रिक्तास्थानानि पूरयत :- (1x4=4)**

(i) कच्छप: –----------- चलति।

(क) शीघ्रम् (ख) उच्चै: (ग) उत्पलुत्य (घ) शनैः

(ii) ज्ञानम् ----------- न जीवनम्।

(क) वृथा (ख) विना (ग) तथा (घ) अपि

(iii) ----------- विदधीत न क्रियाम्।

(क) अचानक (ख कदा (ग) सहसा (घ) उच्चै:

(iv) त्वम् कारादण्डम् लप्स्यसे इति प्रोच्य ---------- अहसत् आरक्षी।

(क) (ख) विना (ख कदा (ग) विना (घ) उच्चै:

**प्रश्न 9. कालबोधकशब्दैः अधोलिखित-दिनचर्याम् पूरयत (1x3=3)**

(क) राम: ब्रह्म मुहूर्ते ---------- 4:30 जागर्ति। (ख) स: ------------ 5:00 योगाभ्यासम् करोति।

(ग) तदनंतरम् स: स्नात्वा ----------- 5:45 संध्योपासनाम् करोति।

**प्रश्न 10. अधोलिखितवाक्येषु रेखांकित-अशुद्धपदाय उचितपदम् चित्वा वाक्यानि पुनः लिखत - (1x3=3)**

(i) मार्गम् गहनकानने सा एकम् व्याघ्रं ददर्श।

(क) मार्ग: (ख) मार्गे (ग) मार्गात् (घ) मार्गस्य

(ii) स: ह्य: पदातिरेव चलिष्यति।

(क) अचलत् (ख) अचल: (ग) चलतु (घ) चलित

(iii) किम् सा कुपित: एवं भणति ?

(क) कुपितो (ख) कुपिता (ग) कुपिता: (घ) कुपिते

**प्रश्न 11. वाच्यानुसारम् उचितपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयित्वा अधोलिखितम् संवादम् पुनः लिखत** **(1x3=3)**

1. भो: वासव ! पुत्रस्य दैन्यम् दृष्ट्वा मया --------- ?

(क) रुद्ये (ख) रुद्यते (ग) रुदयसे (घ) रोदिमि

2. सः दीन इति जानन्नपि सः कृषक: ------------- पीडयति।

(क) तम् (ख) तेन (ग) सः (घ) ताः

3. किम् एतत् भवता न ----------- ?

(क) दृश्यसे (ख) दृश्ये (ग) दृश्यते (घ) पश्यति

**[ खण्ड: (घ) - पठित-अवबोधनम् - 30 अङ्का:]**

**प्रश्न 12. अधोलिखित-नाट्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

सरस्तीरम् ! समय: - प्रभातवेला। तत्र राजहंस: हंसी च विहरत:।

राजहंस: - अये किन्नु खलु सरस्तीरे विहरति मयि केनापि कर्कशै: ' का का' शब्दैः वातावरणं आकुलीक्रियते ?

राजहंसी - भर्त: ! काकात् अन्य: को भवितुमर्हति ? अस्य वर्ण: अपि कृष्ण: , कर्म अपि कृष्णम्। मेध्यम् अमेध्यम् सर्वमेव भक्षयति।

I.एकपदेन उत्तरत - **(1)**

क: ' का का' शब्दैः वातावरणं आकुलीक्रियते ?

II.पूर्णवाक्येन उत्तरत - **(2)**

राजहंस: हंसी च काकध्वनिम् कस्याम् वेलायाम् शृणुतः ?

III.यथानिर्देशम् उत्तरत : - (1x2=2)

1. तत्र राजहंस: हंसी च विहरत:। अत्र क्रियापदं किम् ?
2. अये किन्नु खलु सरस्तीरे विहरति मयि - अत्र कर्तृपदम् किम् प्रयुक्तम् ?

**प्रश्न 13. अधोलिखितम् गद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

अथ एकदा भगवान् बोधिसत्व: बहुजन्मार्जितपुण्यफलै: शिवीनां राजा अभवत्। स: बाल्यात् एव वृद्धोपसेवी विनयशील: शास्त्रपारंगत: च आसीत्। जनकल्याणकर्मसु रत: असौ पुत्रवत् प्रजा: पालयति स्म।

I.एकपदेन उत्तरत - **(1)**

भगवान् बोधिसत्व: कथम् शिवीनां राजा अभवत् ?

II.पूर्णवाक्येन उत्तरत - **(2)**

बोधिसत्व: शैशवात् एव कीदृश: आसीत् ?

III.यथानिर्देशम् उत्तरत : - (1x2=2)

(क) अथ एकदा भगवान् बोधिसत्व: बहुजन्मार्जितपुण्यफलै: शिवीनां राजा अभवत्। अत्र क्रियापदं किम् ?

(ख) जनकल्याणकर्मसु रत: असौ पुत्रवत् प्रजा: पालयति स्म। अत्र कर्तृपदम् किम् प्रयुक्तम् ?

**प्रश्न 14. अधोलिखित-पद्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत :-**

**न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।**

**प्रह्लादयति च पुरुषम् यथा मधुरभाषिणी वाणी।।**

I.एकपदेन उत्तरत - (1)

कीदृशी वाणी पुरुषम् प्रह्लादयति ?

II.पूर्णवाक्येन उत्तरत - (2)

वाणी केभ्य: महात्त्वपूर्णा अस्ति ?

III.यथानिर्देशम् उत्तरत : - (1x2=2)

(i)'शीतला छाया।' अत्र विशेषणपदं किम्? (ii) प्रह्लादयति च पुरुषम् यथा मधुरभाषिणी वाणी।। अत्र क्रियापदं किम् ?

**प्रश्न 15. अधोलिखित-श्लोक<u>स्य</u> अन्वयं मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत : - (1/2x4=2)**

**नास्ति विद्यासमम् चक्षुः नास्ति सत्यसम् तप:। नास्ति रागसमम् दुःखम् नास्ति त्यागसमम् सुखम्।।**

**अन्वय: -** विद्यासमम् (i) --------------- न अस्ति, सत्यसमम् तपः न (ii) ---------------------। रागसमम् (iii) ---------------------- न अस्ति, (iv) --------------------------------- सुखम् न अस्ति।

| **मञ्जूषा - अस्ति , त्यागसमम् ,चक्षु , दुःखम्** |
|---|

**प्रश्न 16. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य अदाहरणानुसारं प्रश्ननिर्माणं क्रियताम् – (1x5=5)**
(क) अभिष्टवस्तूनि प्राप्य **<u>याचकाः</u>** तुष्टाः।
(ख) **<u>दानशालासु</u>** विचरन् राजा अचिन्तयत्।
(ग) स राजा **<u>तान्</u>** उवाच।
(घ) राजा **<u>याचकेभ्यः</u>** दानम् ददाति स्म।
(ड.) **<u>प्राज्ञः</u>** कलहयुक्तम् गृहं दूरतः परिवर्जयेत्।

**प्रश्न 17.अधोलिखित मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत : - (1x4=4)**

कस्मिंश्चित् नगरे चंद्रो नाम (i) -------------------- प्रतिवसति स्म। तस्य पुत्रा: वानरक्रीडारता: (ii) ---------------------नित्यमेव विविधै: भोज्यपदार्थै: पुष्टिम् नयन्ति स्म। तस्मिन् राजगृहे (iii) -------------------------- मेषयूथम् आसीत्। तेषां मेषाणाम् मध्ये एको मेष: जिह्वालोलुपतया अहर्निशम् (iv) ------------------------------ प्रविश्य यत् पश्यति तत् भक्षयति।

**मञ्जूषा**

| |
|---|
| बालवाहनयोग्यम् , महानसम् , वानरयूथम् , भूपतिः |

**प्रश्न 18. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारम् शुद्धम् अर्थं चिनुत –** **(1x4=4)**

(क) स्वाध्यायाभ्यसनं चैव **वाङ्मयं** तपः उच्यते।
(i) साहित्यम् (ii) वाचिकम् (iii) वाक्युक्तम्

(ख) आचार्यात् **पादम्** आदत्ते
(i) श्लोकस्य पङ्क्तिं (ii) चरणम् (iii) चतुर्थान्शिम्

ग. एकदा राजा **सरोवरस्य** समीपे विहरति।

(i) तडागस्य (ii) नगरस्य (iii) नद्याः

घ. भवान् प्रीतः तदा त्वत्तः एकस्य **चक्षुषः** दानं इच्छामि।
(i) श्रोत्रस्य (ii) गात्रस्य (iii) नेत्रस्य